# संस्कृतवार्ता:

दिनाङ्क : 12/07/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् रोज़गार मेला यूनः सशक्तान् विधातुं विकसित-भारतस्य निर्माणे तेषां सक्रिय-सहयोग-प्राप्त्यर्थं सर्वकारस्य प्रतिबद्धतां प्रकटयति। तेन अद्य एकपञ्चाशत् सहस्राधिकेभ्यः युवभ्यः नियुक्ति-पत्राणि वितरितानि।
- अहमदाबादविमानदुर्घटना विषये विमानदुर्घटना-अनुसन्धान-ब्यूरो-संस्थया प्रतिवेदने प्रोक्तं यत् विमाने 'CUTOFF' अभवत्, येन इञ्जिन इत्येतस्मिन् इन्धनस्य अभावः जातः, दुर्घटना चाभवत्। अग्रिमान्वेषणस्य मुख्यं केन्द्रं एतत् एव भविष्यति इति अपेक्षा अस्ति।
- भारत-ऋतु-विज्ञान-विभागेन आगामिषु चतुः पञ्च-दिवसेषु देशस्य मध्यभागेषु, तत्समीपस्थेषु च वायव्यभागेषु महतीतः अत्यन्तां महतीपर्यन्तं वर्षा भविष्यति इति पूर्वानुमानं कृतम्।
- विम्बल्डन्-टेनिस्-क्रीडायां इगा स्वियाटेक्, अद्य रात्रौ लण्डन्-नगरस्य सेण्टर्-कोर्ट् इति मध्ये महिला-एकल-वर्गे अमण्डा अनिसिमोवा इत्यनया सह क्रीडिष्यति। ।

---

<u>प्रधानमन्त्री वृत्यर्थ-मेलापकम्</u>

प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् रोज़गार मेला यूनः सशक्तान् विधातुं विकसित-भारतस्य निर्माणे तेषां सक्रिय-सहयोग-प्राप्त्यर्थं सर्वकारस्य प्रतिबद्धतां प्रकटयति। तेनोक्तं अद्य विश्वं स्वीकरोति यत् भारतस्य द्वे शक्ती वर्तेते। प्रथमा शक्तिः जनसाङ्ख्यकी अपरं च तदीयं लोकतन्त्रम्। प्रधानमन्त्री अद्य वीडियो कॉन्फ्रेंसिंग माध्यमेन विविधेषु प्राशासनिक-विभागेषु एकपञ्चाशत् सहस्राधिकेभ्यः युवभ्यः नियुक्ति-पत्राणां वितरणस्य अनन्तरं रोज़गार मेला इत्यस्मिन् कार्यक्रमे वदति स्म। नवनियुक्तेभ्यः वर्धापनानि यच्छन् श्रीमोदी अवोचत् यत् सर्वकारस्य रोज़गार मेला

उपक्रमेण लक्षशो युवानः केन्द्र-सर्वकारे स्थायी नियुक्तयः प्राप्तवन्तः। राष्ट्र-निर्माणे महत्त्वपूर्णां भूमिकां निभालयन्ति च ।

प्रधानमन्त्रिणा देशे विकसमानानां स्टार्टप नवाचार-अनुसंधानानां च समेधमानस्य इको सिस्टम इत्यस्य अपि उल्लेखो विहितः। यत् हि देशस्य यूनां क्षमताः वर्धयति।

निजी क्षेत्रे वृत्तेः नूतनानावसराणां सर्जने प्रधानमन्त्रिणा उक्तं यत् सद्य एव रोज़गार इत्यनेन सम्बद्धा प्रोत्साहन-योजना अनुमता। तेन प्रोक्तं यत् अनने उपक्रमेण सर्वकारेण एक-लक्ष-कोटि रूप्यकाणि आबंटितानि येन सार्धत्रिकोटि-वृत्त्यवसराणां सर्जने साहाय्यं भविष्यति।

-----------------------------------------------------

<u>वित्तमन्त्री मेघालये</u>

केन्द्रीय वित्तमन्त्री निर्मला सीतारामनः मेघालये एकसहस्र-सप्ताशीति-कोटि-रूप्यकाणां नैकासां परियोजनां शिलान्यासम् उद्घाटनं च कृतवती। शिलांग-स्थिते अन्ताराष्ट्रिय-प्रदर्शन-कला-संस्कृति-केन्द्रे लारीति इत्यत्र आयोजिते कार्यक्रमे तया मुख्यमन्त्रिणः कॉनराड संगमा इत्यस्य नेतृत्वे मेघालयस्य सतत- विकासस्य साहसिक-दृष्टिकोणस्य च प्रशंसा कृता। वित्तमन्त्रिणा उक्तं यत् मेघालयेन राज्येभ्यः निवेशाय विशेष-साहाय्यरूपेण आबण्टितानां चतुः शताधिक-पञ्च-सहस्र-कोटि रूप्यकाणां पूणोपयोगः कृतः। अपरत्र विविधैः राज्यैः स्वीकृत-राशेः पूर्णोपयोगः नैव कृतः।

-----------------------------------------------------

<u>अमित शाह-केरल-यात्रा</u>

केन्द्रीय गृह मंत्री अमित शाह: अवादीत् यत् प्रधानमन्त्री नरेन्द्र मोदी वर्यस्य विकसति-भारतस्य स्वप्न: दक्षिण-राज्यानां विकासेन एव साकार: भविष्यति । श्रीशाहेन अद्य तिरुवनंतपुरम नगरे पुथरिंकदम प्रांगणे भाजपा इति दलस्य राज्य-स्तरीयोपवेशनं संबोधयता प्रोक्तम् यत् केरल-राज्यस्य उन्नति: विकासश्च विकसित-भारतस्य अभिन्नं अंगं वर्तते। श्री शाहेन एतदपि प्रोक्तम् यत् भ्रष्टाचार-मुक्त-शासनं प्रधानमन्त्री-नरेन्द्र-मोदी वर्यस्य मूल-स्वप्न: अस्ति य: केरल-राज्यस्य विकासार्थं आवश्यक: वर्तते।

-----------------------------------------------------

**छत्तीसगढ़ माओवादिन:**

छत्तीसगढ़स्य सुकमाजनपदे अद्य त्रयोविंशति: माओवादिन: आत्मसर्मणं कृतवन्त:। एतेषु माओवादिषु नव महिला: सन्ति। जनपदस्य आरक्षि महानिरीक्षक: किरण चव्हाण: अवादीत् यत् एतेषु माओवादिषु अष्टलक्षाधिक एक-कोटि-रूप्यकाणां पुरस्कारस्य घोषणा आसीत्।

---------------------------------------------------

**अहमदाबादविमानदुर्घटना**

अहमदाबादविमानदुर्घटना विषये विमानदुर्घटना-अनुसन्धान-ब्यूरो-संस्थया गतरात्रौ प्रारम्भिकं पञ्चदश-पृष्ठात्मकं प्रतिवेदनं प्रकाशितम्। अहमदाबादनगरे जूनमासस्य द्वादश दिनाङ्के घटितस्य एयर इण्डिया ड्रीमलाइनर-विमानदुर्घटनायाः प्रारम्भिक-अन्वीक्षण-प्रतिवेदनं प्रकाशितम् अस्ति तथा च अस्य प्रतिवेदनानुसारं विमानस्य उड्डयनानन्तरं कतिपयेषु सेकेण्ड्-अनन्तरमेव विमानस्य इञ्जिनद्वयं वायौ एव स्थगितम्, तदनन्तरं एषा दुर्घटना जाता। तस्मिन् एव काले प्रतिवेदनात् पूर्वं अस्मिन् विषये संशयाः उत्पद्यन्ते स्म, अधुना प्रतिवेदनस्य अनन्तरं तेषां पुष्टिः अभवत् ।

महत्त्वपूर्णम् अस्ति यत् काकपिट इत्यस्य स्वर-मुद्रणे एकः विमानचालकः "किमर्थं इंजनमिति स्थगितवान्" इति पृच्छति श्रूयते । अपरः च विमानचालकः "मया न कृतम्" इति कथयति। तथ्यं तु एतत् यत् स्विच इति कथं 'CUTOFF' अभवत्, येन इञ्जिन इत्येतस्मिन् इन्धनस्य अभावः जातः, दुर्घटना चाभवत् । अग्रे अन्वेषणस्य मुख्यं केन्द्रं एतत् एव भविष्यति इति अपेक्षा अस्ति।

---------------------------------------------------

**ऋतुविज्ञानविभागः**

भारत-ऋतु-विज्ञान-विभागेन आगामिषु चतुः पञ्च-दिवसेषु देशस्य मध्यभागेषु, तत्समीपस्थेषु च वायव्यभागेषु महतीतः अत्यन्तं महतीपर्यन्तं वर्षा भविष्यति इति पूर्वानुमानं कृतम् अस्ति। विभागस्य अनुसारं पूर्वीय-राजस्थानस्य मध्यप्रदेशस्य च एकान्तस्थानेषु अद्य प्रचण्डवृष्टिः भविष्यति। ऋतुविभागेन उक्तं यत् अद्य असम, मेघालय, छत्तीसगढ, तटीय कर्नाटक, गुजरात, हिमाचल प्रदेश, केरल, माहे, उत्तरप्रदेश, उत्तराखण्ड, पश्चिमराजस्थानेषु च अद्य एकान्तस्थानेषु अत्यधिकवृष्टिः भविष्यति।

-----------------------------------------------------

## विम्बेल्डन् टेनिस्-क्रीडा

विम्बल्डन्-टेनिस्-क्रीडायां, पञ्चवारं ग्रैण्ड्-स्लाम् इत्युपाधिधारिका इगा स्वियाटेक्, अद्य रात्रौ लण्डन्-नगरस्य सेण्टर्-कोर्ट् इति मध्ये महिला-एकलेति उपाध्यै अमण्डा अनिसिमोवा इत्यनया सह क्रीडिष्यति। एषा क्रीडा भारतीय-मानक-समयानुसारं रात्रौ सार्ध-अष्टवादने आरप्स्यते।

-----------------------------------------------------

## भारत-इङ्गलैण्ड-टेस्ट-क्रिकेट

टेस्ट्-क्रिकेट्-क्रीडायां एण्डरसन्-तेण्डुलकर-ट्राफीति क्रीडास्पर्धायाः तृतीया टेस्ट्-क्रीडा भारत-इङ्ग्लैण्ड्योः मध्ये लण्दनस्य लॉर्डस्क्रीडाङ्गणे प्रचलति । शृङ्खलायाः तृतीय-स्पर्धायां तृतीये दिने भारतेन प्रथम-पाल्याम् भोजनावकाशं यावत् चतुर्णां क्रीडकाणां हानौ अष्टचत्वारिंशदधिक-द्विशतं धावनाङ्काः अधिगताः। इतः पूर्वम् इंग्लैण्ड दलेन प्रथम पाल्यां सप्ताशीत्युत्तर-त्रिशतं धावनाङ्काः निर्मिताः।

।।इति वार्ता।।